# Shri Advaitananda Stotram

# श्रीअद्वैतानन्दस्तोत्रम्

## Document Information

Text title : Shri Advaitananda Stotram

File name : advaitAnandastotram.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Brahmachari Medhachaitanya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीअद्वैतानन्दस्तोत्रम्

नमोऽस्तुते देववरार्थित क्रियाकृते समस्तान्मनुजे यशस्विने ।
“बूडओ तु गोपाल” इति प्रथाधृते तीर्थाटने लब्ध सुपुण्य वर्मणे ॥ १॥

युवानमेवापि गुरुं प्रियं चिरं विनेय वृद्धा वृणते तपस्विनः ।
तथा त्वमद्वैतपराभिनिष्ठितः क्षमोऽभियाने स्वगुरोरमायया ॥ २॥

तपः समाधौ निरतः स सर्वदाप्रिजुर्बलिष्ठः परमाप्तितर्षुकः ।
समाप्य कर्माणि फलेष्वनाश्रयो यतिर्नियम्येन्द्रियकायमानसः ॥ ३॥

यताशनः संयतभाषणो व्रती गुरोः क्रियासाधनजागृतिर्यमी ।
अहन्यन्यक्षयसिद्धिहेतवे चकार सर्वं भगवन्नियन्त्रितः ॥ ४॥

परेयमेव कृतिभिः समादृताऽपरा च विद्या न तथा सुशोभना ।
विविच्य साधुः स परां समाददे न चापरस्यां रमते स्म संयमी ॥ ५॥

प्रसूनसारग्रहणे समारतो मधुव्रततृप्ततयाऽस्फुटस्वरः ।
परात्मनित्याप्तरसालयग्रहो मुनिर्न वाचं वदति प्रियङ्करः ॥ ६॥

सशारदश्रीभगवद्गदाधरे मनोवचोभिः सहदेहमेव सः ।
समर्पयामास विरज्य सर्वतः ससम्पदो बन्धुजनात्ममित्रतः ॥ ७॥

स्वपार्षदत्वेन वृतस्त्वमस्यहो स्वयं-प्रभू-श्रीभगवन्महात्मभिः ।
न चान्यथात्वं प्रतियाति संसृतौ विधेर्विधानं यदिह प्रधार्यते ॥ ८॥

नभो विशाले विततोर्ध्ववर्त्मनि ज्वलत्प्रभो मेदुरभास्वरग्रहः ।
प्रतीयमानोऽधिविराजसे यथा त्वमात्मनेशेन परेण चिन्मयः ॥ ९॥

अद्वैतानन्दनाथाय नमस्तुभ्यं महाप्रभो ।
पुण्यपुञ्जविपाकेभ्य गृहीतयतिमूर्तये ॥ १०॥

त्वादृशानां कृपादृष्ट्या त्वत्प्रभूचरणाब्जयोः ।
मादृशानां भवेत् स्नानं प्रार्थनेयं प्रपूर्यताम् ॥ ११॥

इति ब्रह्मचारिमेधाचैतन्यविरचितं “श्रीमदद्वैतानन्दस्तोत्रम्” सम्पूर्णम् ।
प्रणाममन्त्रः-
प्रौढायाद्वैतपादाय शिवध्यानपराय च ।
कारुण्यपूर्णचित्ताय सत्यनिष्ठाय ते नमः ॥

Proofread by Aruna Narayanan

*Shri Advaitananda Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*